A.C. Joshi Library
P.U. Chandigarh

MSS No. 337 Subject PHILOSOPHY

Name of MSS काव्य लक्षण

Author

Period Folios 21

Script Sanskrit Source Prithi Pal Singh

Missing Folios 14

काव्यलक्षण
असं० पत्रक ॥ १८ पं० प्र० पृ० ला० भ०

ह० ला०

ॐ श्रीगणेशाय नमः॥ श्रीमद्रामाय नमः॥

श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥

श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्री श्रीराम॥

श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥

श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥

श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥

श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥

श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम

श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्री २

श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ ६५

श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥

श्रीराम॥ श्रीराम॥ श्रीराम श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥

श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥

श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥

श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम

श्रीराम॥ श्रीराम॥ श्रीराम॥ श्रीराम श्रीराम॥ श्रीराम॥ श्रीराम॥

हरयेनमः॥ विघ्नवेनमः॥ श्रीहनुमतेनमः॥ राम॥
राम॥राम॥राम॥राम॥राम॥राम॥राम॥राम॥राम॥राम॥
अथकाव्यलक्षणं॥ तत्रकाव्यप्रकाशेः॥ तददोषौशब्दा का०२
र्थौसगुणावनलंकृतीपुनःक्वापीत्याह॥॥ नके
वलः शब्दः काव्यम्॥ नापिकेवलोऽर्थः काव्यम्॥
किंतुशब्दार्थौमिलितौकाव्यम्॥ तौविशिनष्टि॥
अदोषौशब्दार्थौ॥ शब्देपिकेचिद्दोषाः संभवंति॥
अर्थेपिकेचिद्दोषाः संभवंति॥ गुणा अपिकेचिच्छ
ब्दनिष्ठाकेचिनार्थनिष्ठा॥ अलंकारा अप्येवमि
ति॥ तथाचइदंलक्षणंसिद्धं॥ अदोषौसगुणौस्फु
टास्फुटसाधारणालंकारयुक्तौशब्दार्थौकाव्य
शब्दः काव्यमित्युक्तेसमुद्रघोषादावतिव्याप्तिः॥
अर्थः काव्यमित्युक्तेघटादावर्थेऽतिव्याप्तिः॥
उभयपरत्वेपिश्रुतिकट्वादियुक्तेकार्ज्यर्थप
मित्यादावतिव्याप्तिरतउक्तं अदोषाविति॥
तथामाधुर्यादिगुणरहितेऽतिव्याप्तिवारणाय

सगुणाविति॥ गामानयेत्यादिवाक्येऽतिव्या

प्तिरतउक्तं अनलंकृती॥ ति॥ नन्वीषदर्थे

अनुदराकन्येत्यादिवत्॥ स्फुटालंकाररहि

तेपिकाव्यत्वमस्त्येव॥ तथाचशब्दार्थौसर्व

त्रसालंकारौकाव्यम्॥ क्वापिस्फुटालंकारवि

रहेपिकाव्यत्वमेव॥ अलंकारपदस्यस्फुटा

लंकारपरत्वेपिअपिनास्फुटालंकारसमुच्च

यने॥ तेनाऽलंकारस्यैवप्रयोजकत्वमायातं

स्फुटत्वंचपूर्वाचार्य्यलालीतत्वं॥ अस्फुटत्व

म्प्रतीयमानलक्षणरहितत्वम्॥ ननुप्रसि

द्धाऽलंकारविरहेकाव्यत्वंमित्याह॥ यः

कौमारहरः सएवहिवरस्ताएवचैत्रक्षपा

स्तेचोन्मीलितमालतीसुरभयःप्रौढाःक

दंबानिलाः॥ साचैवास्मितथापितत्रसुरत

व्यापारलीलाविधौ॥ रेवारो

धसिवेतसीतरुतलेचेतःसमुत्कंठते

२ अत्रस्फुटो न कश्चिदलङ्कारः॥ रसस्य हि प्राधा
2 न्यान्नालंकारता॥ अत्र केचित्॥ अर्थोपहितः
शब्दः काव्यमित्याहुः॥ न च व्यञ्जकत्वाऽविशेषे
त्व णोभयत्र काव्यमिति वाच्यम्॥ कविना काव्यं
कृतमित्यादिप्रयोगात्॥ शब्द एव कविकृति
साध्यत्वात्॥ अर्थस्य स्वतः सिद्धत्वात्तत्कृत्यऽ
साध्यत्वा[illegible]दित्याहुस्तन्न॥ आस्वादोद्बोध
कत्वमेव काव्यप्रयोजकत्वं॥ तच्च शब्दे चाऽ
र्थे चाऽविशिष्टं॥ तत्र विनिगमनाभावादुभ
यत्रैव काव्यपदर्वाच्यत्वं॥ काव्यं कृतमित्यादि
प्रयोगस्तु कटः कृतः इत्यादिवत्॥ कटोऽपि
स्वत्वंशोकरणेन तु जात्यंशे॥ तद्वत्काव्येपि
नन्वऽदोषावित्यत्र यत्किंचिद्दोषाभावोऽस
र्वदोषाभावो वा नाद्यः॥ अव्यावर्तकत्वाप
त्तेः॥ दुष्टस्यापि किञ्चिद्दोषशून्यत्वात्॥ अ नान्त्यः
सम्भवातिमत्वात्॥ सर्वदोषाभावस्य कुत्राप्य
क्वापि व्याप्ति

असंभवात्

सम्भवात्कस्यचिद्दोषस्य सर्वत्र सत्त्वात्॥ अ

तएवादिवक्तृके पुनरुक्तादिदोषस्याऽदोषता

भिधानाच्च [illegible] दुष्टेष्वपि काव्य दर्शितकाव्ये

त्वदर्शनात्तदेवोक्तं ध्वनिकृता॥ कीटानुविद्ध

रत्नादिसाधारण्येन काव्यता॥ दुष्टेष्वपि म

ता यत्र रसाद्यनुगमः स्फुटः॥ अत्र केचित्॥

सर्वदोषाभाव एवाविवक्षणीयः॥ काव्यस्य विर

लविषयत्वान्नाऽसम्भवः॥ दुष्टं काव्यमिति प्र

योगस्तु दुष्टो हेतुरितिवत्समर्थनीयः॥ मिश्रा

स्तु अदोषपदस्य स्फुटदोषराहित्यमित्यर्थः

स्फुटत्वं च कविप्रतिभयाऽतिरोधानाभावः॥

आहिताग्निप्रतिभावतां काव्ये काश्चिन्न तिरो

भो यः सामाजिकांश्चित्रार्पितानिव कृ

त्वा दोषानन्याहृयतीत्याहुः॥ अन्ये तु ईष

दर्थे न[illegible]प्रयोगः॥ तर्हीषद्दोषौ शब्दार्थौ का

व्यमित्युक्ते निर्दोषयोः काव्यत्वं न स्यात्॥ स

३ तिसंभवेईश्वरदोषाविति चेन्न।। [redacted]
दे। [redacted] षस्य कार्यत्वविघातकत्वाभावात्।।
३ यथार्थत्वादिलक्षणो तस्यो विशेषाश्रयत्वं
पद्मरागत्वं।। न तु कीटानुविद्धत्वाभावो पि
पद्मरागलक्षणे प्रवेष्टव्यः।। नहि कीटानुवे
धादपौरत्नस्य रत्नत्वं व्याहंतुमीशः।।
एवं प्रकृतेपि।। अन्ये तु दोषाभावविषय
इति वदंति।। अदोषानित्यं च दोषसामान्या
भाव एव विवक्षितः।। तथा च।। सारविवाणीर
निकुंजेवचसः कस्यापि मार्गास्त्वं।। अस्ति
नवीनघनाभसत्वभुजंगाधिपः कोपीत्यादौ
क्वचिद्दोषसामान्याभावस्य सत्वोन्नासंभवः
आतुरादिकाव्यासमानाधिकरणस्य पुनरु
क्तत्वादेरेव गुरुत्वापत्तिप्रकर्षकारतया दो
षत्वात् क्वीकारान्नातिव्याप्तिश्च।। लक्ष्यस्य
विरलत्वाद्वचनामि व्याप्तिरपि।। तदुक्तं।। द्विता

ण्येवकाव्यानिद्वित्राण्येवकवयइति॥ न्यक्का
रोह्ययमेवेत्याद्युत्तमकाव्योदाहरणेंतु
दुष्टभागातिरिक्तभागमात्रस्यपरेवेदि
ध्यंनिर्दोषत्वंस्यात्तदुदाहरणंतूक्तकाव्यमित्यु
पलक्षणतामभिप्रेत्योक्तमिति॥ अन्येत्वे
वंवदंति॥ वृत्तिरीतिभ्यामास्वादव्यंजकं
शब्दार्थयुगलंकाव्यमितिलक्षणं॥ वृत्ति
स्त्रिधाशक्तिर्लक्षणाव्यंजनाचेति॥ रीति
र्गौडीपाञ्चालीचेतिद्विविधा॥ लौकिकवा
क्यंवृत्तिरीतिभ्यामास्वादव्यंजकमितिन
तत्काव्यं॥ नन्वेवंदोषाभावगुणालंका
रयुक्तत्वप्रदर्शनमप्यर्थंस्यादितिचेन्न॥
काव्यातिशयत्वप्रदर्शनार्थंतदुक्तं॥ नतु
लक्षणमध्येप्रवेशः॥ यथातेजोविशेषा
श्रयत्वंपद्मरागाद्यं॥ कीटानुवेधाभावस्तु
तदतिशयमात्रप्रयोजको-नतुलक्षणम

ध्यप्रविष्टः॥ तद्वद्दोषाभाववत्तूत्कर्षत्व
प्रदर्शनार्थः॥ तथा च यथा यथा दोषा
भावो यथा यथा गुणालंकारवत्त्वं तथा
तथोत्कृष्टकाव्यत्वमिति दोषपदेन दोष
सामान्याभावविवक्षितत्वात्॥ नचैवंन्य
क्कारोऽप्ययमेवेत्यादौ ध्वनिकारप्रदर्शि
तोत्तमकाव्येऽतिव्याप्तिः॥ विधेयाऽविम
र्षदोषस्य सत्वादिति वाच्यम्॥ दोषसामा
न्याभावस्य तत्राप्युपपादयिष्यमाणत्वात्
तथाहि॥ न्यक्कारोह्ययमेव मे यदरयस्त
त्राप्यसौ तापसः॥ सोप्यत्रैव निहन्ति राक्ष
सकुलं जीवत्यहो रावणः॥ धिग्धिक्छक्र
जितं प्रबोधितवता किं कुम्भकर्णेन वा॥ स्व
र्गग्रामटिकाविलुंठनवृथोच्छूनैः कि
मेभिर्भुजैः॥ इत्यत्र वक्ष्यमाणरीत्या प्राति
पदजीवानुव्यंग्यवैचित्र्योत्कर्षसहस्रस्य

उत्कृष्टतयाऽपकर्षकत्वविरहेणादोषात्॥
तथाहि॥ अन्येषां पराभवादिन्यक्कारो निन्दा
ममत्वरिसम्बन्धएवन्यक्कारः॥ नैकोद्वौवा
पूर्वमेकोपिनाशीत्स्यमजित्तु युगपदेव व
हवोजाताः॥ तत्राप्यहोतापहः अपरिशी
लितफलः॥ अत्रैव मनुष्यादकोटिपूर्णापं
लेकापामेव॥ निहंति महरति॥ रक्षतीति
स्वस्याकाङ्क्षापरेषां॥ स्वेषामपिरक्षणेऽ
क्षमाकृतं वालवृद्धबल्लीवर्तिकमपि
नत्यजति॥ काहोजीवतीति काकारवए
इतिस्वनामकीर्तनेनजीवनस्यानिन्दाव
गमादनुतापातिशयः॥ जगद्विद्रावय
तीतिरावए लस्याप्येवमित्यनुतापाति
शयः॥ धिग्धिगिति द्विरुक्त्यानिन्दातिश
यः॥ शक्नोतीति शाकलमपिजयतीति
ताक्षीलोक्तिः॥ त्वकोधितवता मादृशा
नाप्यास्यप्रकृतौस्थापितवता॥ स्वर्गस्य

ग्रामटिकायाइवलुंठनं॥हृतात्सर्वस्वानप
नं॥ब्रघ्नोच्चकूर्नेह्यप्याहंकारवह्निः॥अत्रवी
ररसस्यचार्य्यस्यापारव्यभावरूपात्वादप्रक
र्षकप्रतिपदजीवानुव्यंग्यवैचित्र्यामहि
म्नान्यक्कारोपमितिप्रतिकूलवचनात्ता
नेप्यऽयंन्यक्कारइतिअनुकूलवाक्यार्थ
त्तानंस्यादेव॥एतत्स्वऽपिविशेषदर्शनेदर्प
णेमुखमितिभ्रमवत्॥अत्रविधेयस्याऽ
ऽविधेयतयानवगमेनाकांक्षाविरहादिति
रूपवत्वादुष्टत्वमेवेत्यलम्ध्यासेन॥ [redacted]
अन्येतुएकास्मिन्नेवपद्येयदंशेदोषाभावः तदं
शेकाव्यत्वंयदंशेदोषस्तदंशेऽकाव्यत्वं॥तथाचै
कमेवपद्यंकाव्यमकाव्यंच॥यथैकमेवज्ञानं
प्रमाचाप्रमाचेति॥इतिदोषसामान्याभावए
वलक्षणेप्रवेश्य इतिवदन्ति॥तच्चेदंचिन्त्यं॥यत्रां
शेदोषस्तोऽकाव्यत्वप्रयोजकः॥यत्रांशेध्वनिः
सउत्तमकाव्यत्वप्रयोजकइत्यंशांशंतुभयत्रअ

क्रियमाणमिदं काव्यमकाव्यं वा किमपि न स्यात्
ःननु शब्दार्थयोः सगुणत्वविशेषणमनुपपन्नम्
गुणानां रसैकधर्मत्वस्य ये रसस्याङ्गिनो धर्मा
शौर्यादय इवात्मनः इत्यादिना तेनैव प्रतिपादित
त्वात्॥ न च रसाभिव्यंजकत्वेनोपचारत उपपद्य
त इति वाच्यम्॥ काव्यत्वेनाभिमतयोः शब्दार्थ
योः रसोऽस्ति न वा॥ नास्ति चेद्गुणवत्त्वमपि ना
स्ति॥ गुणानां तदन्वयव्यतिरेकानुविधायि
त्वात्॥ अस्ति चेत्कथं नोक्तं रसवन्ताविति॥
गुणवत्त्वान्यथानुपपत्त्या रसवत्त्वस्यापि ल
भ इति चेत्तर्हि सरसावित्येव वक्तुं युक्तं न तु स
गुणाविति॥ प्राणिमन्तो देशा इति वक्तव्ये शौ
र्यादिमन्तो देशा इति केनापि नोच्यते॥ न
नु सगुणौ शब्दार्थावित्यनेन गुणाभिव्यंजकौ
शब्दार्थौ काव्येऽत्र योज्यावित्यभिप्राय इति
चेन्न॥ गुणाभिव्यंजकशब्दार्थत्वस्यापि न का
व्यस्वरूपाधायकत्वे॥ किन्तु काव्योत्कर्षा

६६ धायकत्वं वर्त्तते॥ काव्यस्य शब्दार्थौ

शरीरं॥ रसादिरात्मा॥ शौर्यादिव

दुणाः॥ काणत्वादिवद्दोषाः॥ रीतयो ऽ

वयवसंस्थानवत्॥ अलंकारा कुं

डलादिवदिति॥ अपरटीकाकृन्मतेप

रिभाषा॥ रसो अङ्गी॥ वाच्यवाचको अंगं

वृत्तयः प्राणाः॥ रीतयः षड्बुद्धीन्द्रियाणि

व्युत्पत्तिर्मनः॥ षट्समासाः कर्मेन्द्रिया

णि॥ गुणास्तु माधुर्यादयः॥ अलंकारा

उपमादयश्च इति॥ इति चेन्न॥ गुणादिम

त्वस्य लक्षणे प्रवेशो नास्ति किन्तु काव्या

तिशयित्वप्रदर्शनार्थं सगुणावित्युक्तिरिति

पूर्वमेव प्रतिपादितत्वात्॥ एवं सालंकार

शब्दार्थयोरपि काव्ये उत्कर्षमात्राधायक

त्वमेव॥ न तु शरीराधायकत्वमिति॥ यच्च

क्वचिदस्फुटालङ्कारत्वे उदाहृतं यः कौमा

रहर इत्यादि तत्र विभावनाविशेषोक्तिम

त्वस्यहेतोर्देहालंकारस्यस्फुटत्वात्कथमस्फु
टत्वमितिचेत्तन्न।।अत्रविभावनाविशेषो
क्त्यलङ्कारद्वयमध्यादेकस्या।अस्फुटत्वात्
तथाहि।।कारणाभावेकार्य्योत्पत्तिर्विभा
वनेतिविभावनालक्षणं।।यद्यपिप्रिय
जनमाऽसन्निधिरूपकारणाभावेप्युत्कंठा
रूपकार्य्योत्पत्त्याविभावनाभवतितथा
पिप्रियजनमाऽसन्निधिर्नोत्कंठोत्पत्तौ
कारणम्।।प्रियजनसन्निधानेऽपिप्र
णयकलहादावुत्कंठायाउत्पद्यमा
नत्वात्।।इतिपरिपूर्णलक्षणाभावादस्
फुटत्वं।।एवंविशेषोक्तेरपिकारणसाम
ग्रीनास्ति।।तथाहिविद्यमानेष्वपिका
रणेषुकार्य्याभावइतितल्लक्षणं।।अत्रा
नुत्कंठायाःकारणंपतिसान्निध्यमेव
नास्तिकिन्तुवेतसीतरुतलमपिकारणं

तस्मात्त्रनालीतिकारणसामग्र्यभावः।।
नवास्तुशब्दार्थयुगलेनकाव्यशब्दवाच्य
त्व।।मानाभावात्।।काव्यमुच्चैःपठ्यते।।
काव्यादर्थोवगम्यते।।काव्यंश्रुतमर्थो
नावगतइत्यादिविश्वजनीनव्यवहारा
त्प्रत्युतशब्दविशेषस्यैवकाव्यपदार्थ
त्वप्रतिपत्तेश्च।।नचव्यवहारकाव्यपद
स्यशब्दमात्रलक्षणयोपपादनीयइति
वाच्यम्।।यदिकाव्यपदार्थतयापराभि
मतेशब्दार्थयुगलेकाव्यपदशक्तेःप्रमा
पकंदृढतरंकिमपिप्रमाणंस्यात्तदैवल
क्षणाकल्पनमुचितंस्यात्तदेवनपश्या
मः।।विवादास्पदीभूतवाक्यंचस्वरूप
मेव।।इत्थंचासतिकाव्यशब्दस्यशब्दार्थयुगल
शक्तिग्राहकेप्रमाणे।।प्रागुक्ताद्व्यवहारतःशब्द
विशेषेशक्तिंशक्तिंकोनामनिवारयितुमी

[redacted] मीक्षे॥ एतेन विनिगमना विरहा
दुभयत्र शक्तिरिति प्रत्युक्तं॥ तदेवं शब्दविशेषस्यै
व काव्यपदार्थत्वे सिद्धे तस्यैव लक्षणं वक्तुं युक्तं॥
न तु स्वकल्पितकाव्यपदार्थस्य॥ एषैव च वेदपु
राणादिलक्षणेष्वपि गतिः॥ तदुक्तं॥ सर्गश्च प्र
तिसर्गश्च वंशो मन्वंतराणि च॥ वंशानुवंशचरितं
पुराणं पंचलक्षणम्॥ अन्यथा तत्रापीयं दुरवस्था
स्यात्॥ यत्त्वास्वादोद्बोधकत्वमेव काव्यप्रयोजकत्वं
तच्च शब्दे चार्थे चाविशिष्टमित्याहुस्तदपि न सम्यक्
रागस्यापि रसव्यंजकतया ध्वनिकारादिसकला
लंकारिकसम्मतत्वेन प्रकृते लक्ष्य णीयता
पत्तेः॥ किञ्च वेदनानायपांगानां सर्वेषामपि प्राय
शः तथात्वेन तत्त्वापत्तिर्दुर्वारैव॥ एतेन रसोद्बो
धसमर्थस्यैव लक्षणत्वमित्यपि परास्तम्॥
यत्तु [redacted]॥ अदोषं गुणवत् काव्यमलंकारैरलंकृ
तं॥ रसान्वितं कविः कुर्वन् प्रीतिं कीर्तिं च विन्दति

इतिकाव्यलक्षणमुक्तं।। तत्रगुणालंकारादिनि
वेशस्य काव्यशरीरानाधायकत्वात्।। यत्तुध्व
निकारेणोक्तं काव्यस्यात्माध्वनिरिति।। तत्किंव
स्त्वलंकाररसादिलक्षणस्त्रिविधोध्वनिका
व्यस्यात्माउतरसादिमात्रोवा।। नाद्यः।। प्रहे
लिकादावतिव्याप्तेः।। द्वितीयश्चेदोमितिब्रूमः
ननुयदिरसादिमात्ररूपध्वनिष्काव्यस्यात्मा
तदा अत्ताएत्थ णिमज्जइ एत्थअहं दिवसए
पलोएहि।। मापहिअ रत्तिअंधअ मह सेज्जा
एणिमज्जइहसि।। इत्यादौवस्तुमात्रव्यंग्यत्वे
कथंकाव्यव्यवहारः।। इतिचेदत्रापिरसाभास
वत्तयैवेतिब्रूमः।। अन्यथादेवदत्तोग्रामंगच्छ
तीतिवाक्येतद्भृत्यस्यतदनुसरणरूपव्यंग्या
वगतेरपिकाव्यत्वंस्यात्।। अस्त्वितिचेन्न।।
रसवतएवकाव्यत्वांगीकारात्।। काव्यप्रयोज
नंहिरसास्वादसुखपिण्डदानद्वारेणवेदशास्त्रविमु

स्वानां सुकुमारमतीनां राजपुत्रप्रभृतीनां
विनेयानां रामादिवत्प्रवर्तितव्यं न रावणा
दिवदित्यादिकृत्याकृत्यप्रवृत्तिनिवृत्त्युप
देश इति चिरन्तनैरप्युक्तत्वात्।। तथाचा
ग्नेयपुराणे।। वाग्वैदग्ध्यप्रधानेपि रस ए
वात्र जीवितम्।। इति।। व्यक्तिविवेककारे
णाप्युक्तं।। काव्यस्यात्मनि संज्ञिनि रसादि
रूपे न कस्यचिद्विमतिरिति ध्वनिकारेणाप्यु
क्तम्।। ननु तर्हि प्रबंधांतर्वर्तिनां केषामपि
पद्यानां नीरसानां काव्यत्वं न स्यादिति चेन्न
रसवत्पद्यांतर्नीरसपदानामिवाः पद्य
रसेन प्रबंधरसेनैव तेषां रसवत्त्वांगीका
रात्।। यत्तु वामनेनोक्तं रीतिरात्मा काव्य
स्येति तन्न।। रीतेः संघटनाविशेषात् संघट
नायाः स्वावयवसंस्थानरूपत्वादात्मन
श्च तद्भिन्नत्वात्।। यच्च ध्वनिकारेणोक्तम्

अर्थः सहृदयश्लाघ्यः काव्यात्मायोव्यवस्थि
तः॥ वाच्यप्रतीयमानाख्यौतस्यभेदावुभौस्मृ
६ तौ[redacted]इतिवाच्यस्यात्मत्वं काव्यस्यात्माध्वनि
१ रित्यादिस्ववचनविरोधादेवाऽपास्तं॥[redacted] यत्तु
~~चिंतुगन काव्यमित्यु~~[redacted]वाक्यंरसात्मकं
काव्यमित्याहुस्तन्न॥ गोपीभिः सहविहरन
हरिरित्यादावतिव्याप्तेः॥ अपच कूर्मलोम
पटच्छन्नः शशशृंगधनुर्द्धरः॥ एषवंध्या
सुतोभातिखपुष्पकृतशे[redacted]खरः॥ इत्य
स्यावाक्यत्वाभावेपिकाव्यत्वदर्शनात्॥
यत्तुलोकोत्तरचमत्कारवर्णनानिपुणः
कविः तस्यतादृग्वचःकाव्यमित्यपिनसा
धु अन्योन्याश्रयदोषप्रशक्तेः॥ अथवा
काव्यत्वंनामगोत्वादिवज्जातिरेव॥ यथा
सास्नाद्यवयववतीषुगोव्यक्तिषुप्रत्ये
कमयंगौरयंगौरित्यनुगताकारायेनाऽ

साधारणधर्मेणैवगतिः सर्वजातिल
क्षणः कोप्यसाधारणधर्मोगोत्वंतथाश
ब्दार्थसंघातस्यसहृदयहृदयाह्लाद्यः
कोपिकाव्यत्वलक्षणोधर्मविशेषः काव्य
त्वंजातिरिति॥ यदुक्तंशब्दार्थयुगलदूष
णंतन्न॥ काव्यपदप्रवृत्तिनिमित्तंशब्दार्थ
योर्व्यासक्तं॥ प्रत्येकपर्याप्तंवा॥ नाद्यः॥ एको
नद्वावितिव्यवहारस्येवश्लोकवाक्येनका
व्यमितिव्यवहारस्यापत्तेः॥ नद्वितीयः॥ ए
कस्मिन्नप्येकाव्यद्वयव्यवहारापत्ते॥ त
स्माद्वेदशास्त्रपुराणलक्षणस्येवकाव्यल
क्षणस्यापिशब्दनिष्ठितैवोचिता॥ लक्षणे
गुणालंकारादिनिवेशोपिनयुक्तः उदितं
मेउलंविधोरितिकाव्येइत्यभिसारिकावि
रहिण्यादिसमुदीरितेऽभिसरणविधि
निषेधजीवनाभावादिपरेगतोलमर्कइ

त्यादौ चाऽव्याप्त्यापत्तेः ॥ न चेदमकाव्यमि
२० ति शक्यं वदितुं ॥ काव्यतयापराभिमतस्या
10 पि वक्तुं शक्यत्वात् काव्यजीवितं चमत्का
रित्वं चाविशिष्टमेव ॥ गुणालंकारत्वादे
रननुगमाच्च ॥ दुष्टं काव्यमिति व्यवहारस्य
बाधकं विना लाक्षणिकत्वायोगाच्च ॥
न च संयोगाभाववान्वृक्षः संयोगीति व
देशभेदेन दोषरहितं दुष्टमिति व्यवहा
रे बाधकं नास्तीति वाच्यं ॥ मूले महीरु
हो विहगमसंयोगी न शाखायामिति
प्रतीतेरिवेदं पद्यं पूर्वार्धे काव्यमुत्तरा
र्धे न काव्यमिति स्वरसवाहिनो विश्वजनीना
नुभवस्य विरहात् ॥ अत्याप्यहृाजितायां
मपि तस्यायोगात् ॥ शौर्यादिवदात्मध
र्माणां गुणानां हारादिवदुपस्कारकाणां
मलंकाराणां च शरीरघटकत्वानुपपत्तेः अ

पद्मुरसवदेवकाव्यमितिसाहित्यदर्पणेनिरूपितं
तन्न॥वस्त्वलंकारप्रधानानांकाव्यानामकाव्य
त्वाप्रसंगात्॥नचेष्टापत्तिः॥महाकविसंप्रदा
यस्याकुलीभावप्रसंगात्॥तथाचजलप्रवाह
वेगनिपतनोत्पतनभ्रमणानिकविभिर्वर्णि
तानि॥कपिबालादिविलसितानिच॥ नचतत्रा
पियथाकथंचित्परंपरारसस्पर्शोऽस्त्येवेति
वाच्यम्॥ईदृशरसस्पर्शस्यगौश्चलतिमृगोधा
वतीत्यादावतिप्रसक्तत्वेनाऽप्रयोजकत्वात्॥
अर्थमात्रस्यविभावानुभावव्यभिचार्यन्यत
मत्वादितिदिक्॥अथतत्किंपुनःकाव्यमिति
तल्लक्षणंनिरूप्यते॥रमणीयार्थप्रतिपादकः
शब्दःकाव्यम्॥लोकोत्तराह्लादजनकज्ञानगो
चरता॥लोकोत्तरत्वंचाह्लादगतश्चमत्कारत्वा
परपर्यायोऽनुभवसाक्षिकोजातिविशेषः॥
कारणंचतदवच्छिन्नेभावनाविशेषः॥पुनःपुन

११ रनुसंधानात्मा॥ पुत्रस्तेजातोधनंतेदास्यामीति
॥ वाक्यार्थधीजन्यस्याऽऽह्लादस्यन लोकोत्त
रत्वमतोनतास्मिन्वाक्येकाव्यत्वप्रसक्तिः॥
इत्थंचचमत्कारजनकभावनाविषयार्थ
प्रतिपादकशब्दत्वंयत्प्रतिपादितार्थविष
यकभावनात्वंचमत्कारजनकतावच्छेदकं
तत्वं॥ स्वविशिष्टजनकतावच्छेदकार्थ
प्रतिपादकतासंबंधेनचमत्कारवत्वमेववा
काव्यत्वमितिफलितम्॥ तच्चोत्तमोत्त
ममध्यमाधममेदाच्चतुर्धा॥ यत्रशब्दार्थौ गुणी
भावितात्मानौ कमप्यर्थमभिव्यंक्तस्तमाद्यं॥ क
मपीतिचमत्कृतिभूमिं॥ तेनाऽगूढस्फुटव्यंग्ययो
र्निरासः॥ असुंदरस्यापि॥ एवंसंदिग्धप्राधान्य
तुल्यप्राधान्यकाक्वाक्षिप्तानामपिबोध्यम्॥ अप
रांगवाच्यसिद्ध्यंगव्यंग्यस्यापिचमत्कारितया त
द्वारणाय गुणीभावितात्मानावित्ति॥ शब्दार्थावे

त्या व्यंग्यप्राधान्याभिप्रायिकं उदाहरणम्॥
प्रार्थितास्त्वविधेयानीश्वरास्सफलीकर्तुं महामनो
रथान्॥ दयिता दयितानानाम्बुजं दरमीलन्नय
ना निरीक्षते॥ अत्रालम्बनस्य नायकस्य स्ववि
धप्रार्थनाविज्ञस्य रहस्यानादेरुद्दीपनस्य च
विभावस्य तादृशनिरीक्षणादेरनुभावस्य औ
त्सुक्यादेश्च व्यभिचारिणः संयोगाद्रतिरभि
व्यज्यते॥ अत्रालम्बनादीनां स्वरूपं वक्ष्यते॥
नच यद्यपि प्रार्थितः स्यात्तदास्याननं चुम्बेयमिति
नायिकेच्छाया एव व्यंग्यत्वमस्त्विति वाच्यम्॥
मनोरथान्सफलीकर्तुमसमर्थोऽस्यनेन मनोर
थाः सर्वेऽस्या हृदि तिष्ठन्तीति प्रतीतेः॥ स्वशब्देन
मनोरथपदेन सामान्याकारेण तादृशेच्छाया
अपि निवेदनात्॥ [redacted] न च मनोरथ
पदेन मनोरथत्वाकारेण सामान्येनेच्छाया

अभिधानेपि चुम्बेयमितिविषयविशेष
विशिष्टेच्छात्वेनव्यंग्यत्वे किंबाधक
मितिवाच्यम्॥ चमत्कारानस्यादित्यस्यैव
बाधकत्वात्॥ नहिविशेषाकारेणव्यंग्येपि
सामान्याकारेणाभिहितोर्थः सहृदयानां
चमत्कारमुत्पादयितुमीष्टे॥ कथमपि
वाच्यत्वत्यागालिंगितस्यैवव्यंग्यस्यचम
त्कारित्वेनालंकारिकैःस्वीकारात्॥
नचात्रपक्षेयदेवोच्यतेतदेवव्यंग्यं।यथातु
व्यंग्यंनतथोच्यत इत्यादिपर्यायोक्तप्रक
रणस्यमूलग्रंथविरोध इतिवाच्यम्॥
चुंबनेच्छायारत्यनुभावत्वेनैवसुंदरत्वेनतदव्यं
जनेचुंबयामीतिशब्दबलात् चुंबनेच्छावदचम
त्कारि[illegible]त्वात्॥ एवंत्रपायामपिनप्राधान्येन
व्यंग्यत्वं॥ अनुवाच्यतावच्छेदकतयाप्रती
तायांतस्याममुख्यवाक्यार्थत्वायोगात्॥

नचदरमीलन्नयनत्वविशिष्टनिरीक्षणं

विधेयमितिनानुवाद्यतावच्छेदकत्वंत

स्यादितिवाच्यम्॥ एवमपितयनगतदरमील

नस्यतत्कार्य्यत्वेपिदरमीलन्नयनत्वविशि

ष्टनिरीक्षणस्यरतिमात्रकार्यत्वात्॥ त्रपा

याएवमुख्यत्वेनव्यंग्यत्वेनिरीक्षणोक्ते

रनतिप्रयोजनकत्वापत्तेः॥ वाच्यव्रत्पार

नेरनुभावेनिरीक्षणेत्रपायाश्चानुभावस्य

दरमीलन्नयनत्वस्यैवव्यंजनयातस्यातस्याः

श्चापिगुणीभावव्यत्ययौचित्यात्॥ यथावा

गुरुमध्यगतामयानतांगीनिहितानीरज

कोरकेणमंदं॥ दरकुंडलतांडवंनतभ्रू त

तिकंमामवलोक्यघूर्णितासीत्॥ २॥ अत्र

घूर्णितासीदित्यनेनाऽसमीक्ष्यकारिन्किमि

दमनुचितंकृतवानसीति अर्थसंवलितोऽ

मर्षस्यवर्णनविश्रांतिधामत्वात्प्राधान्येनव्य

व्यज्यते ॥ तत्र श्लोकोऽप्यस्य गुरुणः ॥ तथा तत्स्व

गतापि च स्थितत नुः स्वास्त्र संगत या से हे ॥ संप
ति साहृदयगतं श्रीपार्वतीं मंदस्मा द्विपति
॥ इदं च काव्यं नव वधूगत लज्जेन पूर्व साकांक्षामि
ति दिङ्मात्रेणात्यारव्यायते ॥ या न व वधूः
पर्यंक शायिता श्वासस्या संगमात्रेणापि
संकुचितं गलति का भूत ॥ सांप्रतिम
स्या न पूर्वरजन्यां प्रतत्सपत्यतिकाग्नि
येणा स्तु संकेत समर्पितं हृदि पाणिं न व व
धू जातिस्वाभाव्यादा द्विपति परंतु मंद ॥
अत्र श्लोके स्वस्या न मा पणात्मना मंदा दे
पेण स्त्या रव्या ः स्या पी संलक्ष्यक्रमतया
व्यज्यते उपपादयिष्यते चास्या व्यादीना
मपि संलक्ष्यक्रमव्यंग्यत्वं ॥ क्रमुमेव चाग
मेदं ध्वनि मामनान्ति ॥ यत्तु द्वितीयमीमांसा
यां मध्यपदीति तैर्निः शेषच्युतचंदनं

स्तनतटं निर्मृष्टरागोधरो नेत्रे दूरमनंजने पुल
किता तन्वी तवेयं तनुः ॥८॥ मिथ्यावादिनि दूति
बांधवजनस्याज्ञातपीडागमा ॥ वापीं स्नातु
मितो गतासि न पुनस्तस्याऽधमस्यांतिकम्
अत्र नायकस्याऽभिसारणाय प्रेषितायां
ते हे भुज्यस्समागतायां दूत्यां हे भोगचिह्नेन
स्फुटीभवति तस्याऽपराधे उदासीनेषु तत्सं
वरणाय तस्याश्चाटप्रकाशनाय स्वान कार्य
भ्रष्टत्वेन विदग्धनायिका तत्कार्यमाह ॥
वापीत्यादि ॥ हे दूति त्वं वापीं स्नातुं गतासि
इति संबंधः ॥ निःशेषच्युतचंदनं स्तनतटमि
त्यादी ॥ नोऽविशेषणानां स्नानान्वयानुप
पत्त्या अधमपदसहायैरेभिरनविशेषणै
स्त्वं रंतुं गतासीति व्यज्यते अन्वयानुपपत्ति
यथा ॥ निःशेषच्युतचंदनं स्तनतटं नितरां
शेषो यत्र तत् संपूर्णचंदनं भ्रष्टं नास्ति किंतु

स्तनतटे भ्रष्टं ।। परं तु संपूर्णस्नानेन भ्रष्टं ।। स्ना
नेन तु संपूर्णस्नाने भ्रष्टं भवति ।। तटं समीपे सम
भिप्रायस्थलं तत्र चंदनं निःशेषच्युतं अन्य
त्र स्नानसंबंधिचूचुकाग्रादिषु सशेषं ।।
वापीतीरस्य जनाकीर्णतया व्रीडया तथाविध
मार्जना[redacted]विरहात् ।। एवं निर्मृष्टरागो
धरः अधरस्त्ववरागो निर्मृष्टो न तु परितनोष्ठ
रागो मृष्टः न्युब्जतया तत्र जलास्पर्शात् ।।
चुंबनविरोधाच्च ।। नेत्रे दूरमनंजने ईषदं
जनरहिते ।। स्नानेन संपूर्णमंजनं गच्छति ।।
दूरत्वाप्यांजनरहिते क्षालनात् चुंबनाच्च
दूरं न तु तत्स्नानसमये मर्दनात् ।। चुंबनाभा
वाच्च ।। इयं तन्वी तनुः पुलकिता जातरोमो
द्गमा ।। वापीस्नाने रोमोद्गमो न भवति ।। तत्र ध
र्मनिवृत्तेरेव जायमानत्वात् ।। मिथ्यावादि
नि तदंतिकं गतत्वा साद्भाविनि वद्दू

धाम्यर्थितोपिनापातइत्यावेदितिचरणवमे
कास्मतभतारणंतवशीलंशीत्यपोषं॥द्द
त्तिदूतस्यमिथ्याभिधानेह्यभावः॥श्रियर
मणोनचबांधवजनस्यपथ्यापीडादुःखं
भवतितल्लज्जानाशिइत्यन्वयानुपपत्त्याल
हारणमूलव्यंजनयारंतुंगतासीतिव्यज्यते
यतःस्नानसुरतयोरेकंकार्य्यं इतिव्याचक्षते इ
तिकेचित॥तदयुक्तं॥निःशेषच्युतचंदनादीनां
जनसंभवेशीतकालेपिसंभवात्॥तथानाधिक
याशीतकालेऽप्यस्नानकरणादेतत्सर्वसं
भवत्येव इतिनान्वयानुपपत्तिः किंतुस्नानप्र
काशनमुखेनरंतुंगतासीतिव्यज्यते॥यतःस्नान
सुरतयोरेकंकार्य्यं निःशेषच्युतचंदनादिकं स्ना
नप्रकाशनमुखेनसुरतकार्य्यंव्यज्यते निःशे
षच्युतचंदनादीनामुभयकार्य्यत्वात् इदंध्व
न्युदाहरणमित्युक्तं नतेतदलंकारशास्त्रतत्त्वा

१६ नवबोधनिबंधनम्॥ प्राचीनसकलग्रंथविरु
16 द्धत्वात् उपपत्तिविरोधाच्च॥ तथाहि॥ पंचमो
ल्लासशेषे निःशेषेत्यादौ गमकतयाख्याऽभिचं
ना दनच्यवँदीनि उपाङ्गानि तानि कारणांतरतोऽपि
भवंति यतश्नानादेवत्वात् स्नानकार्यत्वेनोपाङ्गानी
तिनोपभोगस्य व्यतिबद्धानीति अनैकांतिकानी
तिकाव्यप्रकाशकृतोक्तं॥ अथ च तत्रैव भग
धाम्नि अवीसद्धइत्यादौ लिंगभ्रमालिंगितानरूपेणा
नुमानेन यल्लिंगतार्थ्यं च तो व्याप्तिविवेककृतो
मतं मत्या चलाणेन व्यभिचारित्वेनाऽसिद्धत्वेन
च हेत्वाभासमानादपि लिंगाव्यंजनमभ्युपगतं॥
इत्यमेवव्वध्वनिकृतापि प्रयत्नोद्योते [redacted] पा व्यंचव्यंजकानामा
धारणं प्रतिपादयितुं प्रामाणिकानां ग्रंथैः
सह अभाधारणं प्रतिपादयतस्तव ग्रंथस्य
सविरोधः स्फुटः॥ किंच यदिदं निःशेषेत्या

प्यर्वांतरवाक्यार्थीनोवापी त्वानव्याप्ता जि ह्वारेण

व्यंग्याऽसाधारण्यं रूपा प्यतेतत्किमर्थमिति

व छ्राम: व्यंग्यव्यंजनतार्थमितिचेन्न॥ व्यंज

कगतासाधारणपस्यव्यंजनानुपायात्॥

अैणिहृ दावल्ल चिंता कल सङ्गणां सणी सखि

रङ्गं॥ मरहमंदमाइणीकेरं सहि हृदहविपरि हवइ

इत्यादैासाधारणानामेवोनिष्पादीनांवक्त्रा

दिवैशिष्ट्यवशाऽर्थविशेषव्यंजकतापाभ्य

भ्युपगतेः॥ वस्तुतासाधारणपस्यव्याप्त्याऽपर

पर्यायस्याऽनुमानानुकूलत्तपाव्याप्तिग्रति

कूलत्वाद्धेमिदिक्॥ यत्रव्यंग्यमप्रधानमेव

तच्चमत्कारकारणंतद्वितीयं॥ वाच्यापेक्षया

गप्रधानीभूतव्यंग्यांतरमादाय गुणीभूतव्यंग्य

मादायाऽतिव्याप्तिवारणायावधारणं॥ तेन

तस्यध्वनित्वमेव॥ लीनव्यंग्यवाच्यचित्रातिं

प्रसंगवारणाय चमत्कारीत्यादि॥ यत्तु

१७ अताहृशिगुणीभूतव्यंग्यैव्यंग्येनुमध्यमं॥ अता
हृशिनाच्चारःन तिशयिनीतिकाव्यप्रकाशगत
17 लक्षणेव्यंग्येचान्यत्वेटीकाकारेर्दत्तं तत्व॥
पर्यायोक्तसमासोक्त्यादिप्रधानकाव्येष्वव्या
प्त्यापत्तेः॥ तेषांगुणीभूतव्यंग्यतायाश्चैवतता
याश्चसर्वालंकारिकसंमततत्वात्॥ उदाह
रणम्॥ राघवविरहज्वालासंतापितसह्य
शैलशिखरेषु॥ शिशिरेसुखंसपानाः कप
यःकुर्वंतिपवनतनयाय॥ अत्रजानकी
कुशलावेदनेनराघवःशिशिरीकृत इ
तिव्यंग्यं आकस्मिककपिकर्तृकहनूमद्वि
षयककोपोपपादकतयागुणीभूतमपि
दुर्दैववशात्दास्यमनुभवन्राजकलत्र
मिवकाममपिकमनीयतामावहति॥ य
तः अत्रराघवशिशिरीकरणरूपव्यंग्यस्यको
परूपवाच्यार्थोपपादकत्वे ततएवगुणीभू

सह्यनामकाद्रिशिखरेषु

तत्त्वं॥ नन्वेवमपि प्रागुक्तध्वनित्वनीयत्व
द्रूपेतत्त्वागतापि चहतनुरित्यादिपद्यै स्वस्या प्रियकर
नज्ञापणरूपात्तेपगतमां प्यरूपवाच्यार्थस्य
नवव धूगृहक्रीति विरुद्धस्य अर्थोपपद्यमान
स्यरत्यारव्यस्याधिना व्यंग्येनैवोपपत्तिः॥ तथा
चात्रापि व्यंग्यस्य वाच्यार्थोपपादकतया
गुणीभूतत्वमेव संभवतीति कथमुक्तमोत्र
मतात्तस्योति चेन्न॥ अनुदिनसरखुपदेशा
द्विभिरनतिचमत्कारिभिरप्युपपद्यमाने मा
ध्यमिरं प्रथमाश्चितचुम्बिनीं विप्रलंभरति
मप्रकाशयन्त्वात्तं व्येण परनिर्वृत्तिचर्वणा
गोचरतामाधातुं न प्रभवति॥ इत्थमेव नि:
शेषच्युतचंदनमित्यादिपद्ये स्वधमाद्वादी
नि वाच्यानि व्यंग्यातिरिक्तेनार्थेनाऽपाति
तोनिष्पन्नशारीराणि व्यंजकानीति तत्रा
पि गुणीभावः शंकनीयः॥ अनयोर्भेदपो

रनपह्नवनीयचमत्कारयोरपिप्राधान्याप्रा
धान्याभ्या मणिकाञ्चनसदृशयवैलोवि
शेषः॥ ॥यत्तुचित्रमीमांसाकृतोक्तम
प्रहरविरतौमध्येवाह्नस्ततोपिपरेण वा॥
किमुत सकलेयातेवाह्निप्रियत्वमिहैष्यसि॥
इतिदिनशतप्राप्यंदेशंप्रियस्ययियासतो
हरतिवालालापैःसवाष्पगलज्जलैः॥
इत्यत्रसकलगमेःपरमावधित्वेनःपरं
प्राणान्धारयितुंनशक्नोमीतिव्यंग्यंप्रि
यगमननिवारणरूपवाच्यसिद्ध्यंगमि
तिगुणीभूतव्यंग्यमितितन्न॥ सवाष्प
गलज्जलानांप्रहरविरतावित्याद्यालापा
नामेवप्रियगमननिवारणरूपवाच्यसि
द्ध्यंगतयाव्यंग्यस्यगुणीभावाभावात्॥
आलापैरितितृतीययाप्रकृत्यर्थस्यह
रणक्रियाकरणतायाःप्रतिपत्तेः॥

नच व्यंग्यस्यापि वाच्यसिद्ध्यंगतात्र संभव
ति तित्तथोक्तमिति वाच्यम्॥ निःशेषच्यु
तचंदनमित्यादावधमत्वरूपवाच्यसि
द्ध्यंगतायाद्दूतीसंभोगादौ संभवाद्गुणीभा
वापत्तेः॥ कल्लोलात ततः परं प्राणान्धारयि
तुं नशक्नोमीति व्यंग्यस्य वाच्यसिद्ध्यंगत
यागुणीभावः॥ तथापि नायकादेर्विभाव
स्य बाष्पादेरनुभावस्य चिंतावेगादेश्च
संचारिणः संयोगादभिव्यज्यमानेन वि
प्रलंभेन ध्वनित्वं को निवारयेत्॥
यत्र व्यंग्यचमत्कारासमानाधिकरणो वा
च्यचमत्कारस्तत्तृतीयम्॥ यथा यमुनाव
र्णने तनयमैनाकगवेषणलंबीकृतजल
धिजठरप्रविष्टहिमगिरिभुजायमाना या भग
वत्याः भागीरथ्याः सखी त्विश्रको लोतानाचै
वचमत्कृतिहेतुः॥ श्वैत्यपातालतलचुंबि·

१९ 19 त्वादीनां चमत्कारो लेशतयाऽसन्नप्युक्ते
नाचमत्कृतिजठरनिलीनो नागरिकेतर
केसरसः
ग्रामीण नायिकाकाल्पितकाश्मीरद्रवांगरागनि
गीर्णनिजांगगौरिमेव प्रतीयते ॥ अत्र च
मत्कारो लेशतयाऽसन्नपीत्युक्त्या व्यंग्यास
मानाधिकरणमेव कुतो नोक्तमित्याशं
का निरासः ॥ न हि तादृशो रसिकोऽपि कश्चि
द्यो येन नागरिकव्यंग्याःस्फुटतया प्रतीयमा
नेऽसत्त्वेऽतो रमणीयता माधातुं प्रभवति ॥
अनयोरेव द्वितीयतृतीयभेदयो जागरूकाऽ
जागरूकगुणीभूतव्यंग्ययोः प्रविष्टं निखि
लमलंकारप्रधानं काव्यम् ॥ यत्रा
र्थचमत्कृत्युपस्कृता शब्दचमत्कृतिः
प्रधानं तदधमं चतुर्थं ॥ यथा ॥
मित्रात्रिपुत्रनेत्राय त्रयीशात्रवशत्रवे ॥ गोत्रारि
गोत्रजत्राय गोत्रात्रे ते नमो नमः ॥ कास्यार्थः

गोत्रात्रेऽनितरां तस्य चातुर्य्यं तं ॥ गोरक्षके
त्पर्य्यः ॥ शिवाय विघ्नेवानमो नमः ॥ मि
त्रात्रिपुत्रनेत्राय त्र्यीचंद्रनेत्राय ॥ त्रयी वेद
त्रयी तस्या नवेशानुत्वं यस्य मदनस्य दे
त्यानां वा तच्छत्रवे ॥ गोत्रारिः इंद्रः त
द्गोत्रजा देवास्तद्गुरु काये त्यर्थः ॥ अर्था
र्थचमत्कृतिः शब्दचमत्कृतो लीना ॥
ननु यत्रार्थचमत्कृतिरूपा शब्दचमत्कृति
र्भवति तत्पंचममधमाधममपि काव्यादि
च्चोपह्याणि चेत्तुमुचितं तत्कथं नो क्तमिति
चेत्सत्यं ॥ यद्यप्येकाक्षरपद्या ऽर्धावृत्ति प
मक पद्मबंधादिकाव्येऽर्थचमत्कृतिशून्या
शब्दक्रांतिर्भवति तद्वत्तु पंचमं काव्यं गतथा
पिरमणीयार्थप्रतिपादकशब्दतारूपकाव्य
सामान्यलक्षणाक्रांततया वस्तुः काव्य
त्वाभावेन महाकविभिः प्राचीनपरंपरामनु

१९ ध्यानैस्तत्रतत्रकाव्ये गुणिवद्भुमपिनाऽस्मा
19A भिर्गणितंवस्तुस्थितेरेवानुरोधपरत्वात्॥
अत्रकेचित्प्रकाशकारादयःऽमानऽपिचत्वरोभे
दानऽगणयंत उत्तम मध्यमा ऽधमभावेनत्रिवि
धमेवकाव्यमाचक्षते तत्राऽर्थचित्रशब्दचित्र
योरविशेषेणाऽधमत्वमुक्तंतदऽयुक्तम्॥ ता
रतम्यस्यस्फुटतरमुपलब्धेः॥ कोप्येवंस
हृदयःसन्विनिर्गतंमानदमात्ममंदिरा
द्भवत्युपकृत्ययदृच्छयापिये॥ ससंभ्रमेंद्र
द्रुतपातितार्गलानिमीलिताक्षीवभियाम
रावती॥ अमरावतीभियाभयेननिमीलि
ताक्षीवभवतीत्यन्वयः॥ किंकृत्वा यंहय
ग्रीवं आत्ममंदिराद्विनिर्गतमुपकृत्य
कथंभूतंहयग्रीवं मानदंमहंकारंशत्रोर्यच्छ
तीति॥ मित्रायमानंसत्कारंददातीतिमानदं
इतिकाव्यप्रकाशेयुक्तम्॥ सच्छिन्नमूलः

सततजैनरेणुलस्योपरिष्टात्पवनावधूतः॥
म्नंगारशोणस्फुहुताशनस्यपूर्वोगिरिस्थितोधूमर
वाऽवभासे॥ उत्पप्यदिग्दितोज्जै[illegible]नकाष्येनराद
स्वच्छंदोच्छलरच्छकच्छकुहरच्छातेतरा
म्बुच्छटा॥ मूर्छनोह महर्षिहर्षविहित
स्नानाह्निकाह्नाय वः॥ भिद्यादुद्यदुदार
दर्दुरदरीदीर्घादरिद्रद्रुमद्रोहोद्रेक महोर्मि
मेदुरमदामंदाकिनीमंदताम्॥ मंदाकि
नीवो युष्माकं मंदतां म्लानां पापत्तिं भिद्यात्
स्वच्छंदेन स्वेच्छया उच्छलंत्यो अच्छानि
मैलाकच्छदेशेषु जलमायनिम्नस्थले
षु च्छातेतरा स्थूलाम्बुच्छटा जलकल्लो
लाः॥ ताभिः मूर्छन्मोहो येषां ते च महर्षय
स्तैर्महर्षिभिर्हर्षेण स्नानं आह्निकं च
यस्याः सा पुनः उद्यत उदारा वहवो दर्दुरा
मण्डूकायासु ताः दर्यः तास्ताभिः दीर्घे

ष्वस्मदरिद्रेषु समृद्धेषु द्रुमेषु द्रोणोद्रेकाप
20 घातेचतेमहोर्मयश्च्यतेमेदुरोऽधिको मदो
२० यस्याः सा इत्यादीनां पामरश्लाघ्यानाम
विशेषं ब्रूयात् ॥ नन्वस्तु विनिर्गत[illegible]
मानदमात्ममंदिरात् सछिन्नमूलः
क्षतजेनरेणुः इत्यादिभिः काव्यैः सदृ
स्वच्छंदोच्छलदित्यादीनां काव्यानां
विशेषस्तथापि शब्दचित्र[redacted]चित्रो[redacted] त्वाऽर्थ
त्वेन[redacted] चित्रत्वावच्छिन्नमेकमेव स्यादि
ति नच वाच्यम् ॥ तत्त्वपि तारतम्ये यद्ये
कभेदत्वमंगीक्रियते तदा ध्वनिगुणी
भूतव्यंग्ययोरीषद्भेदत्तरयोरपि भेदो न
स्यात् ॥ ॥ यत्रशब्दार्थचमत्कृत्यो
रेकाधिकरणे तत्र तयोर्गुणप्रधान
भावपर्यालोचनया लक्षणं व्यवहर्तव्यम्
समप्राधान्ये तु मध्यमत्वेव ॥ यथा ॥ उच्छ्ला

त्सःफुल्लपंकेरुहघटलपतन्मत्तपुष्पंधयानां॥
निस्सारःशोकादावानलविकलहृदांकोकसी
मंतनीनां॥उत्पाततत्तामसीनामुपहतमहसां
चक्षुषांपक्षपातः॥संघातःकोपिधाम्ना
मयमुदयगिरिप्रांततःप्रादुरास्ते॥रविबि
म्बं॥उदयाचलप्रांतभागादयंकोपिवि
लक्षणोधाम्नांतेजसांसमूहःप्रादुर्भवति॥
तत्ररूपकंचतुर्धा॥विकसितकमलस
मूहमध्यावधिकनिःसरणयुतरसपान
जोन्मादवद्भ्रमरगणामुल्लासः॥ तादृशको
कीनांनिस्सारःदुःखोद्भूतः॥ नासिततेजसां
तामसानांतमःसमूहानांउत्पातःनाशकः
नेत्राणांपक्षपातःसहकारी॥अत्रप्रत्य
ग्रासप्राचुर्यादोजोगुणप्रकाशकत्वाच्च
शब्दस्यप्रसादगुणयोगादनंतरमेवा
धिगतस्यरूपकस्यहेत्वलंकारस्य
वावाच्यस्यचमत्कृत्योःतुल्यत्वंद्र
ष्टव्यत्वसमेवप्राधान्यं॥तत्रध्वनेरु

त्तमोत्तमस्याऽसंख्यभेदस्याऽपिसामान्यतः
केपिभेदानिरूप्यंते॥ द्विविधोध्वनिर
भिधामूलोलक्षणामूलश्च॥तत्राद्य
स्त्रिविधोवस्त्वऽलंकारध्वनिभेदात्॥रस
ध्वनिरित्यऽसंलक्ष्यक्रमोपलक्षणात्॥रस
भावतदाभासभावशांतिं भावोदय भाव
संधिभावशवलत्वानादुःहरणम्॥ द्वितीय
स्यद्विविधोऽर्थांतरसंक्रमितवाच्योऽत्य
न्ततिरस्कृतवाच्यश्च॥ एवंपंचात्मके
ध्वनौपरमरमणीयतयारसध्वनेः तदा
त्मारसस्तावदभिधीयते॥ समुचित
ललितसन्निवेशचारुणाकाव्येन समर्पि
तैः सहृदयहृदयंगमविष्टैः तदीयसहृ
दयतासहकृतेन भावनाविशेषमहि
म्ना विगलितदुःख्यंतरमणीत्वादिभिः
अलौकिकविभावाऽनुभावव्यभिचारि
शब्दव्यपदेश्यैःशकुंतलादिभिरालंब
नकारणैः चंद्रिकादिभिरुद्दीपनका

शौरे रक्तपातादिभिः कार्यैः चिंतादिभिः सहकारि
भिश्च हंसरूपणादुर्भावितेनाऽलौकिकेन व्यापारेण
तत्कालनिवर्तितानंदांशावरणज्ञानेन कारग
रावणमुखपरिमितप्रमातृत्वादिनिजधर्मेणप्र
मात्रास्वप्रकाशतयाखालवेन निजस्वरूपानंदे
न सहगोचरीक्रियमाणः शाविनिविष्टवासना
रूपो रत्यादिरेव रसः॥